## आन्महतः समानाधिकरणजातीययोः । (४६/८०७)

[1]समानाधिकरणे उत्तरपदे जातीये च प्रत्यये परतो महतः आकारादेशो भवति । महादेवः । महा–ब्राह्मणः । [2]महाबाहुः । महाबलः । [3]जातीये – महाजातीयः । समानाधिकरणजातीययोः इति किम् ? महतः पुत्रः महत्पुत्रः । लक्षणोक्तत्वादेवात्र न भविष्यति इति चेद् बहुव्रीहावपि न स्याद् महाबाहुः इति । तदर्थं [4]समाना–धिकरणग्रहणं क्वतव्यम् । अमहान् महान् [5]सम्पन्नो महद्भूतश्चन्द्रमाः इत्यत्र गौणत्वान् महदर्थस्य न भवत्यात्वम् ।

[७३६] महदात्वे घास[6]करविशिष्टेषूपसङ्ख्यानं पुंवद्वचनं चासमानाधिकरणार्थम् । (म. भा. ३.१६१)

महत्याः घासः महाघासः । महत्याः [7]करः महा[8]करः । महत्याः विशिष्टः महाविशिष्टः ।

[७३७] अष्टनः कपाले हविष्युपसङ्ख्यानम्[9] । (म. भा. ३.१६१)

अष्टाकपालं [10]चरुं निर्वपेत् । हविषि इति किम् ? अष्टकपालं ब्राह्मणस्य ।

[७३८] गवि च युक्तेऽष्टन उपसङ्ख्यानं कर्तव्यम् । (म. भा. ३.१६१)

अष्टागवेन शकटेन । युक्ते इति किम् ? अष्टगवं ब्राह्मणस्य । तपरकरणं विस्पष्टार्थम् ॥

## द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः । (४७/८०८)

द्वि अष्टन् इत्येतयोः आकारादेशो भवति सङ्ख्यायामु[11]त्तरपदे अबहुव्रीह्यशीत्योः । द्वादश । द्वाविंशतिः । द्वात्रिंशत् । अष्टादश । अष्टाविंशतिः । अष्टात्रिंशत् । द्व्यष्टनः इति किम् ? [12]पञ्चदश । सङ्ख्यायाम् इति किम् ? द्वैमातुरः । आष्टमातुरः । अबहुव्रीह्यशीत्योः इति किम् ? द्वित्राः । [13]त्रिदशाः । द्व्यशीतिः ।

[७३९] प्राक् शतादिति वक्तव्यम् । (म. भा. ३.१६१)

[14]इह मा भूत्, द्विशतम् । [15]द्विसहस्रम् । अष्टशतम् । अष्टसहस्रम् ॥

## त्रेस्त्रयः । (४८/८०९)

त्रि इत्येतस्य त्रयस् इत्ययमादेशो भवति सङ्ख्यायामबहुव्रीह्यशीत्योः । त्रयोदश । त्रयोविंशतिः । त्रयस्त्रि–शत् । सङ्ख्यायाम् इत्येव, त्रैमातुरः । अबहुव्रीह्यशीत्योः इत्येव, त्रिदशाः । त्र्यशीतिः । प्राक्शतात् इत्येव, त्रिशतम् । त्रिसहस्रम् ॥

---

1. समानाधिकरणे–महत्पुत्रः नास्ति फ. 2. महासेनः ह. 3. जातीयः क. 4. समानाधिकरणं कर्तव्यम् क. ह. 5. भूतः फ. 6. °कार ड. ह. 7–8. कारः ड. ह. 9. कर्तव्यम् इत्यधिकम् ह. 10. चरुं नास्ति क, पुरोडाशं ह. 11. उत्तरपदे नास्ति फ. 12. पञ्चदशः क. 13. द्विदशाः क. ह. 14. इह नास्ति फ. 15. उदाहरणमिदं नास्ति फ.